International Journal of Sanskrit Research 2023; 9(3): 211-214

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 211-214
© 2023 IJSR
www.anantaajournal.com
Received: 01-03-2023
Accepted: 06-04-2023

**हरिहरदासः**
दर्शनाध्यापकः,
रामाधीनसंस्कृतमहाविद्यालयः,
ब्रह्मपुरम्, गंजामः, ओडिशा,
भारत

**Corresponding Author:**
**हरिहरदासः**
दर्शनाध्यापकः,
रामाधीनसंस्कृतमहाविद्यालयः,
ब्रह्मपुरम्, गंजामः, ओडिशा,
भारत

# गोकुलदर्शने ईश्वरतत्त्वम्

## हरिहरदासः

**सारांश**

दर्शनशब्दः आत्मसाक्षात्कारार्थं प्रयुक्तः । सरहस्यमये निगूढतमेऽन्धकारेऽस्मिन् प्रपञ्चे तत्त्वमार्गप्रदर्शकं ज्ञानविशेषं विशेषप्राप्तिप्रयोजकं दर्शनमेव शास्त्रशब्देन व्यवह्रियते । "शास्ति च"[1] "त्रायते च"[2] "शंसति च"[3] इत्यादिभिः शास्त्रात्मकत्वाद्दर्शनशब्दः सिद्धः । भारतीयाः सततं तत्त्वज्ञानार्जने निरता इति सर्वे जानन्ति । ते शान्तचित्ताः जितेन्द्रियाः दिव्यचक्षुषोऽखिलं पदार्थज्ञानं करतलामलकवत् प्रत्यक्षीकुर्वाणाः विचारविवेकशीलाश्च भूत्वा मानवसमुदायस्य श्रेयसे कल्याणकामनया च यानि तत्त्वानि, यांस्च सिद्धान्तान् बुद्धियुक्तसहितान् ज्ञानप्राप्तिसाधनभूतान् आविर्भावयामासुः, तानि दर्शनशब्देन व्यवह्रियन्ते । तेषां तपस्सम्भूतायाः धिषणायाः निखिलानां जागतिकानां पदार्थानां मूलतः आलोचनापूर्वकः तत्त्वज्ञानप्राप्तयै युक्तिपूर्वकश्च यः प्रयत्नः साधितः स एव दर्शनशब्दवाच्यो भवति । अस्मिन् प्रसंगेऽत्र गोकुलदर्शने ईश्वरसारांशः दिङ्मात्रं प्रदर्श्यते ।

**कूटशब्द:** गोकुलदर्शने ईश्वरतत्त्वम्, आत्मसाक्षात्कारार्थं, निगूढतमेऽन्धकारेऽस्मिन्

## प्रस्तावना

### दर्शनकारस्य सामान्य-परिचय

ब्रह्मकुलावतीर्णो वत्सगोत्रीयः परमवैष्णवाचार्यो वेद-वेदान्त-मार्त्तण्डादि अनेकोपाधिविभूषितः श्रीमत्परमहंस-परिव्राजकाचार्यः श्रीगोकुलदासमहाराजो गोकुलदर्शनकलानिधेः रचयिता अस्ति। असौ महात्मा उत्कलीय एव। १९४० विक्रमीयसम्बत्सरस्य पौषशुक्लतृतीयायां शुभपुण्यतिथौ भौमवासरे गंजाम ब्रह्मपुरस्थित "रंगीपुरशासने" एकस्मिन् ब्राह्मणपरिवारे अयं स्वास्तित्वसंपन्न आसीत् । अस्य पितुर्नाम गोपीनाथाचार्य आसीत्। मातुर्नाम अज्ञातम्। अस्य महात्मनो पूर्वनाम गोविन्दाचार्य श्रूयते।[4] महायोगी महावैष्णवो गोकुलदासो महाप्रभोः हनुमतः आसीत् प्रियतमो भक्तः। स रामानन्दसंप्रदायस्य परमाचार्य्यः । अनपायिन्या भक्त्या सः देवाधिदेवं हनुमन्तं प्रसन्नीकर्तुं समर्थोऽभवत् । तत्प्रसादेन नानामन्त्रसिद्धयः तस्य करायत्ता बभूवुः । गच्छत्सु कालेषु पुनः सः शिकारपुरं गुरुस्थानमागतवान्। तत्र स्थित्वा दीनदुःखितानां जनानामहर्निशं

---

[1] शासु अनु शष्टौ १०७५ पा णनीये धातुपाठे

[2] त्रैङ पालने ९६५

[3] शंसु स्तुतौ ७२८ धातुः

[4] गोकुलदर्शने

सेवामकरोत्। कुत्रापि योगविभूत्या सिद्धमन्त्रादिप्रयोगेण तेषामसाध्यरोगान् विदलयितुं समर्थो बभूव । कालान्तरे पुनः हरिद्वारमागतवान् । श्रीरामसेवा तस्य सर्वश्रेष्ठा उपासना आसीत्। सर्वत्र जगद्गुरोः रामानन्दस्य मतं प्रचाराय तस्य चेष्टा बलवत्तरा आसीत् । सनातनधर्मं भारतीयसंस्कृतिशिक्षां च प्रदातुं तेन देशस्य बहुनि स्थानानि परिभ्रमितानि। शिषैः सार्द्धं जगन्नाथधाम पुरीं समागत्य तत्र बहुन् जन्नान् रामानन्दिदीक्षां दत्तवान् । स्वात्मीयजनान् उद्धर्तुकामः जन्मभूमिं रंगीपुरमागतवान् । सर्वशेषे हरिद्वारे गोकुलधाम्नि मानवीयलीलां समाप्य वैकुण्ठधाम प्रत्याजगाम। संप्रति गोकुलधाम्नि मठे गोकुलदासस्य भागिनेयस्य भागिनेयो महन्तः परमेश्वरदासः गुरुपरंपरां संपालयति ।

## शोधोपक्रम

अयं गोकुलदर्शन-कलानिधि-नामको महान् ग्रन्थो कदाचित् वायुदर्शननाम्नाभिहितः। जगद्गुरुणा गोकुलदासमहाराजेन विरचितमष्टाध्यायैर्विभजितमिदं सूत्रात्मकं शब्दब्रह्म कदाचित् सीतारामसन्दर्शनं कारयतीति प्रयोजनमस्य । तत्र तत्राध्यायेषु विभिन्नास्तिकनास्तिकमतानामुट्टंकनं, विभिन्नानामनुकूलमतानां समर्थनं प्रतिकूलमतानां च खण्डनपूर्वकाणि १११ सूत्राणि दरीदृश्यन्ते । विशेषतो वायुदर्शने योगमार्गस्य समर्थनं,ब्रह्मचर्यधारणपूर्वकयोगमार्गेण सहजसाध्यात्मप्रतीतिर्भवतीति विशेषप्रजोजनमुक्तम्। प्रमेयसिद्धिहेतोः वेदस्य महती प्रासंगिकता अत्र प्रमाणिता । गोकुलदर्शनं मुख्यतया रामानन्ददर्शनोपरि पर्यवेशितम्। रामानन्ददर्शनमपि विशिष्टाद्वैतदर्शनस्य छायात्मकमिति केचन वदन्ति। रामानन्दस्याविर्भावविषये यत्किमपि तथ्यमुपलभ्यते। पुरुषोत्तमाचार्यः श्रीक्षेत्रनिवासी भगवतो विष्णोः अंशरूपेण धराधाम्नि आविर्बभूव। तस्य शिष्यपरंपरायां राघवानन्दः आगतः। राघवानन्दात् रामानन्दः। स भगवतो व्यूहात्मकः परमो वेदज्ञः। यज्ञशालायां राघवानन्दात्दीक्षां प्राप्तवान्। तथाहि पांचरात्रे-

शंखः साक्षात् वासुदेवो गदा संकर्षणः स्वयम् ।
बभूव पद्मं प्रद्युम्नोऽनिरुद्धस्तु सुदर्शनः ॥
रामानन्द-सुधी शंखः चक्रं निम्बार्कनामभाक् ।
गदा हि विष्णुस्वामी च पद्मं वै माधवस्तथा ॥[5] इति ।
व्यूहविषये च-
चौबीस प्रथम हरि त्यों चतुर्वूह कलियुग प्रगट ।
श्री रामानन्द उदार सुधानिधि अवनि कल्पतरु ॥
रामानन्दमते मुख्यतत्त्वानि

रामानन्द-रामानुजयोर्मध्ये वस्तुतः सिद्धान्तः साम्यः। ईश्वरस्वरूपे तु क्वचिद्भेदः परिलक्ष्यते। रामानुजमते नारायणः परमेश्वरः। रामानन्दमते श्रीरामपरमेश्वरः। रामानुजे द्वादशाक्षरवासुदेवमन्त्रः, रामानन्दे च रामषडक्षरो मान्यः इत्यनयोर्विभेदः इष्ट-मन्त्रयोर्मध्ये । चिदचिदीश्वरभेदेन भोक्तृभोग्यनियामकनियामकभेदेन च व्यवस्थितास्त्रयः पदार्था अत्र मान्याः। तदुक्तं माधवाचार्येण-

ईश्वरश्चिदश्चिदेति पदार्थत्रितयं हरिः ।
ईश्वरश्चिदिति प्रोक्तो जीवो दृश्यमचित्पुनः ॥[6]

अत्र चिज्जीवो भोक्ता । अचिज्जडपदार्थजातं भोग्यम् । ईश्वरश्च तयोरन्तर्यामी भूत्वा नियामको भवति । एतत्सर्वं प्रसंगक्रमे तत्तदध्याये प्रवेदयिष्यामः ।
"अथ ईश्वरसिद्धिमीमांसा"[7] इति गोकुलदर्शनस्य आदिमं ईश्वरविषयकं सूत्रम् । ईशयति चतुर्वर्गफलप्राप्तौ प्रेरयतीति विग्रहे वरचि ईश्वर इति[8] भाष्याकाराः वेणीमाधवाचार्याः । "ईश ऐश्वर्य्ये" इत्यस्माद्धातोः वरचि[9] ईश्वरशब्दः सिद्ध्यति। महाभाष्ये ईश्वरस्य भावः ऐश्वर्यः[10] इति। भारतीयदर्शने ईश्वरविषये बहुविचाराः बहुविप्रतिपत्तयश्च दरीदृश्यन्ते । सर्वेषु वैदिकेषु दर्शनेषु च ईश्वरविषये विशिष्टा चर्च्चा विद्यते। विस्तरभयान्नोच्यतेऽत्र । परमेश्वरः श्रीरामचन्द्रः । असौ ईश्वरः स्वेच्छया रचयति,स्थापयति,संहरति चेति सर्वशक्तिमान् नातः परः कोऽपि नियामकः प्रयोजको वा विद्यते । "लोकवत्तु लीला कैवल्यम्"[11] इति श्रुतेः । कस्मात् ईश्वरस्याविर्भावः ? उच्यते-

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"[12]

लीलया म्लेच्छसंहारार्थं धर्मसंस्थापनार्थं च भगवतो परमेश्वरस्य आविर्भावकारणमुक्तम्। ईश्वरः भूतजन्तूनामादिकारणमुक्तम्। स सर्वज्ञः। ज्ञानशक्त्यादिकल्याणगुणभूषितः। कोऽयञ्चोक्तम्-

[5] नारद पाञ्चरात्रे

[6] सर्वदर्शनसंग्रहे ९२

[7] गोकुलदर्शनम् सू १

[8] गोकुलदर्शने १म सूत्रभाष्ये

[9] पाणिनीयसूत्रे ३/२/१७४

[10] महाभाष्ये २/३/९

[11] ब्र०सूत्रम्-२/१/३३

[12] गीता ४/ ७-८

ईश्वरः सर्वभूतानामादिकारणमुच्यते ।
सर्वज्ञो ज्ञानशक्त्यादिकल्याणगुणभूषितः ॥
धर्मार्थकाममोक्षाणां प्रदाता रघुनन्दनः ।
दिव्यविग्रहसंयुक्तोऽनन्तानन्दो जगत्पतिः ॥[13]

इति । स च परमात्मा पर-व्यूह-विभव-अन्तर्यामि-अर्चावतारभेदेन विभक्तः । तदुक्तम्-

तथान्तश्चरमाणोऽपि न भवेद् दूषितो हरिः ।
परव्यूहादिभेदेन विज्ञेयः स च पञ्चधा ॥
बहुभिर्द्वारपालैश्च कोटपालैश्च संयुतः ।
महामणिसमाकीर्णे मण्डपे च विराजितः ॥
शोभया परया युक्तः किरीटकुण्डलादिभिः ।
महाराज्ञ्या च जानक्या भूलीलाभ्याञ्च सेवितः ॥
परो हि भगवान् रामः परे लोके सुशोभितः ।
संकर्षणश्च प्रद्युम्नोऽनिरुद्ध इति भेदतः ॥
विज्ञेयश्च त्रिधा व्यूहो जगत्सृष्ट्यादिकारकः ।
पूर्णो ज्ञानबलाभ्यां च संकर्षण इति स्मृतः ॥
बीर्यैश्वर्ययुतस्तत्र प्रद्युम्न इति कथ्यते ।
शक्तितेजोविशिष्टस्तु ह्यनिरुद्ध इतीरितः ॥[14]

ज्ञानबलाभ्यां संकर्षणः । बीर्यैश्वर्याभ्यां प्रद्युम्नः । शक्तितेजोभ्यामनिरुद्धः त्रिधा व्यूहाः विख्यातेति तत्र सर्वं परिष्कृतम् । किं बहुना, अस्य परमेश्वरस्य परमात्मनो जगन्नियन्तृ मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य महाप्रभोः सर्वेश्वरत्वं सयौक्तिकं प्रमाणितम् ईशावास्यमन्त्रे । तथाहि प्रामाण्यम्-
"ईशा वास्यमिदं सर्वं यत्किञ्चि जगत्यां जगत् ।"[15] इत्यत्र ईशा ईष्ट इति इट् तेन सर्वनियामकेन परमपुरुषेण श्रीरामाख्येन वास्यम् व्याप्यम् नियाम्यमिति भावः । एतेन चिदचिद् रूपस्य समस्तस्य जगतः परमात्माधीनत्वप्रदर्शनात् स्वातन्त्रभ्रमनिवृत्तिरुपदिष्टा । अत्र अचित्पदार्थस्य अन्यथा भावः स्वरूपविकाररूपः स च भोग्यतासंपतये भवति। चित्पदार्थस्य नित्यत्वात् स्वरूपविकारो न सम्भवति। अतः तस्य अन्यथाभाव ज्ञानसंकोचविकासादिरूपस्वभावविकारात्मकः । सोपि भोक्तृत्वसंपत्तये । अतः उभयमपि जगत् इत्यनेन संगृहीतम् ध्येयम् । "अत्र जगत्पदेन भोक्तृभोग्ययोः ईशेत्यनेन ईश्वरस्य कथनात् चिदचिदीश्वररूपं तत्त्वत्रयमीशेशितव्यभेदश्च उक्तो भवति। एवं चाखिलश्रुतिस्मृतीतिहासपुराणसामञ्जस्यादुपपत्तिबलाच्च विशिष्टाद्वैतमेवास्य ब्रह्ममींमासाशास्त्रस्यस्य विषयो न तु केवलाद्वैतमिति" [16] एवं पूर्वार्धेन परमात्माधीनत्वं जगत्सर्वमिति निष्कर्षः भाष्यकारस्य ।[17] वेणीमाधवस्य । परमात्मा सृजति "सो कामयत" [18] अस्य परमात्मनः महाकारणं [19] विद्यते तदनुमेय इति सूत्रकारवचनं प्रणिधानयोग्यम्। अत्र ईश्वरोऽनुमेयः। अनुमानगम्यः अनुमानेन निश्चीयते इति ।

**उपसंहारः**

विशिष्टाद्वैतवादी रामानुजाचार्य्यः श्रीवैष्णवसंप्रदायस्य प्राथम्येन प्रथितो महान् दार्शनिको मनीषी । तेन ब्रह्मसूत्रस्य उपनिषदां च विशिष्टाद्वैतपरं व्याख्यानमुपस्थाप्य विशिष्टाद्वैतदर्शनस्य महती चेष्टा प्रतिष्ठापिता । विशिष्टं च विशिष्टं च विशिष्टे विशिष्टयोः स्थूलचिदचिद्विशिष्टब्रह्मणः सूक्ष्मचिद्विशिष्टब्रह्मण्श्चाद्वैतं भेदभाव ऐक्यमिति विशिष्टाद्वैतम्। अत्र त्रयः पदार्था विवेचिताः चिदचिदीश्वरभेदात् । चिदत्र जीवात्मानो बहवः । अचित्तुजडरूपं जगत्। सकलकल्याणकरः करुणावरुणालयः सर्वज्ञः सर्वशक्तिमान् स्वयंप्रकाशः जगत्प्रभुः श्रीमन्नारायणोऽद्वितीयश्चेतनः साध्यः ईश्वरो जीवं जडं जगच्च व्याप्नोति। स च तयोः जीवजडयोरन्तः स्थित्वा तयोर्नियामकत्वात् अन्तर्यामीति व्यपदिश्यते। जीवो जगच्च ईश्वरस्य देहौ । ईश्वरः कदापि ताभ्यां शून्यो न भवति । चतुर्दशब्रह्माण्डा अनन्तजीवाश्च तच्छरीरम् । साध्यसिद्ध्यर्थं न ज्ञानं नापि ज्ञानकर्मसमुच्चयः किन्तु भक्तिरेव मान्या । रामानुजमते वैकुण्ठलोके भगवतः किंकररूपेण अवस्थानं कैवल्यम्। तत्प्राप्तिश्च ज्ञानकर्मभ्यां साध्यया भगवत्प्रपत्तिलक्षणया भक्त्या । भगवत्प्रपत्तिश्च भगवतः शरणागतिः । वेदविहितकर्मणामनुष्ठानेन चित्ते निष्कलुषे सति ब्रह्मणो जिज्ञासा समुदेति । ततः गुरुप्रप्तिः । गुरुपदेशेन च ज्ञानं प्रकाशते । ततः ज्ञानकर्मणोरुभयोः संपन्नत्वे भगवत्प्रपत्तिलक्षणा भक्तिर्जायते । भक्तिपूर्णचेतस्कं जीवं भगवान् अनुगृह्णाति तद्वशाश्च जीवस्य भगवतोऽपरोक्षानुभवो जायते। ततः मुक्तिरिति। गोकुलदर्शनं रामानुजदर्शनान्न भिन्नम्। नात्र रामानुज-रामानन्दयोः कश्चिद् दार्शनिको भेदः। ईश्वरविषये यो नामगतो भेदो स तु सांप्रदायिकः। वस्तुतो न राम-नारायणयोर्मध्ये कोऽपि तात्त्विको भेदोस्ति। साध्यसिद्ध्यर्थं साधनमेव भक्तिः । सा वरीयसी गरीयसी च। अलमति विस्तरेण।

---

13 तत्त्वत्रयबोधः-३०-३१

14 तत्त्वत्रयबोधः ३४-३९

15 ई०उ०१

16 ब्र०सू० आनन्दभाष्यम्१/१/१

17 ई०उ०१ आनन्दभाष्यम्

18 तै०उ०-६

19 गो०द०सू०-३

**सहायकग्रन्था**


1. गोकुलदर्शनकलानिधिः
2. तैत्तरीयोपनिषत्
3. ईशावास्योपनिष्त्,आनन्दभाष्यम्
4. भगवद्गीता,आनन्दभाष्यम्
5. ब्रह्मसूत्रम्,आनन्दभाष्यम्
6. तत्त्वत्रयबोधः
7. सर्वदर्शनसंग्रहः
8. अष्टाध्यायिसूत्रम्
9. नारदपञ्चरात्रम्
10. वैष्णवमताब्जभास्करः
11. यतीन्द्रमतदीपिका
12. भागवतदर्शनम्
13. प्रसंगपारिजातः
14. भक्तिचन्द्रिका
15. भक्तिरत्नावली